# ॥ अव्यक्तोपनिषत् ॥

# || avyaktopaniṣat ||


**Informazioni:**
Titolo: Avyakta Upanishad
Nome file: avyakta_upanishad
Categoria: Upanishhad
Locazione: http://www.culturavedica.org/sanscrito-sanskrit
Autore: Tradizione vedica
Linguaggio: Sanscrito
Soggetto: Filosofia/Religione/Induismo
Translitterazione: http://www.culturavedica.org
Correzione: http://www.culturavedica.org
Descrizione: 68 di 108, Vaishnava Upanishad
Ultima revisione: 13 maggio 2018
Accesso: http://www.culturavedica.org/pdf/avyakta_upanishad
Mail: info@culturavedica.org
Font: Sanskrit 2003
Testo editabile disponibile: info@culturavedica.org



**© Quest'opera è stata digitalizzata e messa a disposizione da "CulturaVedica", può essere usata per la ricerca e lo studio personale. Non può essere usata (senza permesso) per scopo promozionale o commerciale.**

Aiutate a mantenere il rispetto e lo spirito del sito.

# ॥ अव्यक्तोपनिषत् ॥

(अव्यक्तनृसिंहोपनिषत् )
(सामवेदीया )
स्वाज्ञानासुरराड्ग्रासस्वज्ञाननरकेसरी ।
प्रतियोगिविनिर्मुक्तं ब्रह्ममात्रं करोतु माम् ॥
ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च ॥
सर्वाणि सर्वं ब्रह्मोपनिषदं माहं
ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरण
मस्त्वनिराकरणं मेस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते
मयि सन्तु ते मयि सन्तु ॥
ॐ शान्तिः शान्तिः शान्तिः ॥
(सृष्टेः पुरा निर्विशेषब्रह्मस्थितिः)
हरिः ॐ ।
पुरा किलेदं न किञ्चन्नासीन्न द्यौर्नान्तरिक्षं
न पृथिवी केवलं ज्योतीरूपमनाद्यनन्तमनण्वस्थूलरूपमरूपं
रूपवदविज्ञेयं ज्ञानरूपमानन्दमयमासीत् ।
(परमेष्ठिप्रादुर्भविः)
तदनन्यत्तद्द्वेधाभूद्धरितमेकं रक्तमपरम् ।
तत्र यद्रक्तं तत्पुंसो रूपमभूत् ।
यद्धरितं तन्मायायाः ।
तौ समगच्छतः ।
तयोर्वीर्यमेवमनन्दत् ।
तदवर्धत ।
तदण्डमभूधैमम् ।
तत्परिणममानमभूत् ।
ततः परमेष्ठी व्यजायत ।
(परमेष्ठिनः स्वकृत्यजिज्ञासा )
सोऽभिजिज्ञासत किं मे कुलं किं मे कृत्यमिति ।
तं ह वागदृश्यमानाभ्युवाच भोभो प्रजापते
त्वमव्यक्तादुत्पन्नोऽसि व्यक्तं ते कृत्यमिति ।
किमव्यक्तं यस्मादहमासिषम् ।
किं तद्व्यक्तं यन्मे कृत्यमिति ।
साब्रवीदविज्ञेयं हि तत्सौम्य तेजः ।
यदविज्ञेयं तदव्यक्तम् ।
तच्चेज्जिज्ञाससि मावगच्छेति ।
स होवाच कैषा त्वं ब्रह्मवाग्यदसि शंसात्मानमिति ।
सा त्वब्रवीत्तपसा मां विजिज्ञासस्वेति ।
स ह सहस्रं समा ब्रह्मचर्यमध्युवासाध्युवास ॥१॥
द्वितीयः खण्डः
(परमेष्ठिनः आनुष्टुभीविद्यादर्शनम्)
अथापश्यदृचमानुष्टुभीं परमां विद्यां
यस्याङ्गान्यन्ये मन्त्राः ।
यत्र ब्रह्म प्रतिष्ठितम् ।
विश्वेदेवाः प्रतिष्ठिताः ।
यस्तां न वेद किमन्यैर्वेदैः करिष्यति ।
(आनुष्टुभीविद्यया नृसिंहदर्शनम्)
तां विदित्वा स च रक्तं जिज्ञासयामास ।
तामेवमनूचानां गायन्नासिष्ट ।
सहस्रं समा आद्यन्तनिहितोङ्कारेण पदान्यगायत् ।
सहस्रं समास्तथैवाक्षरशः ।
ततोऽपश्यज्ज्योतिर्मयं श्रियालिङ्गितं सुपर्णरथं शेषफणाच्छदितमौलिं
मृगमुखं नरवपुषं शशिसूर्यहव्यवाहनात्मकनयनत्रयम् ।
(नृसिंहस्तुतिः)
ततः प्रजापतिः प्रणिपपात नमोनम इति ।

# || avyaktopaniṣat ||

(avyaktanṛsiṃhopaniṣat)
(sāmavedīyā)
svājñānāsurarāḍgrāsasvajñānanarakesarī |
pratiyogivinirmuktaṃ brahmamātraṃ karotu mām ||
om̐ āpyāyantu mamāṅgāni vākprāṇaścakṣuḥ śrotramatho balamindriyāṇi ca ||
sarvāṇi sarvaṃ brahmopaniṣadaṃ māhaṃ
brahma nirākuryāṃ mā mā brahma nirākarodanirākaraṇa
mastvanirākaraṇaṃ mestu tadātmani nirate ya upaniṣatsu dharmāste
mayi santu te mayi santu ||
om̐ śāntiḥ śāntiḥ śāntiḥ ||
(sṛṣṭeḥ purā nirviśeṣabrahmasthitiḥ)
hariḥ om̐ |
purā kiledaṃ na kiñcannāsīnna dyaurnāntarikṣaṃ
na pṛthivī kevalaṃ jyotīrūpamanādyanantamanaṇvasthūlarūpamarūpaṃ
rūpavadavijñeyaṃ jñānarūpamānandamayamāsīt |
(parameṣṭhiprādubhaviḥ)
tadananyattaddvedhābhūddharitamekaṃ raktamaparam |
tatra yadraktaṃ tatpuṃso rūpamabhūt |
yaddharitaṃ tanmāyāyāḥ |
tau samagacchataḥ |
tayorvīryamevamanandat |
tadavardhata |
tadaṇḍamabhūdhaimam |
tatpariṇamamānamabhūt |
tataḥ parameṣṭhī vyajāyata |
(parameṣṭhinaḥ svakṛtyajijñāsā )
so:'bhijijñāsata kiṃ me kulaṃ kiṃ me kṛtyamiti |
taṃ ha vāgadṛśyamānābhyuvāca bhobho prajāpate
tvamavyaktādutpanno:'si vyaktaṃ te kṛtyamiti |
kimavyaktaṃ yasmādahamāsiṣam |
kiṃ tadvyaktaṃ yanme kṛtyamiti |
sābravīdavijñeyaṃ hi tatsaumya tejaḥ |
yadavijñeyaṃ tadavyaktam |
taccejjijñāsasi māvagaccheti |
sa hovāca kaiṣā tvaṃ brahmavāgyadasi śaṃsātmānamiti |
sā tvabravīttapasā māṃ vijijñāsasveti |
sa ha sahasraṃ samā brahmacaryamadhyuvāsādhyuvāsa ||1||
dvitīyaḥ khaṇḍaḥ
(parameṣṭhinaḥ ānuṣṭhubhīvidyādarśanam)
athāpaśyadṛcamānuṣṭubhīṃ paramāṃ vidyāṃ
yasyāṅgānyanye mantrāḥ |
yatra brahma pratiṣṭhitam |
viśvedevāḥ pratiṣṭhitāḥ |
yastāṃ na veda kimanyairvedaiḥ kariṣyati |
(ānuṣṭubhīvidyayā nṛsiṃhadarśanam)
tāṃ viditvā sa ca raktaṃ jijñāsayāmāsa |
tāmevamanūcānāṃ gāyannāsiṣṭa |
sahasraṃ samā ādyantanihitoṅkāreṇa padānyagāyat |
sahasraṃ samāstathaivākṣaraśaḥ |
tato:'paśyajjyotirmayaṃ śriyāliṅgitaṃ suparṇarathaṃ śeṣaphaṇācchaditamauliṃ
mṛgamukhaṃ naravapuṣaṃ śaśisūryahavyavāhanātmakanayanatrayam |
(nṛsiṃhastutiḥ)
tataḥ prajāpatiḥ praṇipapāta namonama iti |

CULTURAVEDICA

तथैवर्चाथ तमस्तौत् ।
उग्रमित्याह उग्रः खलु वा एष मृगरूपत्वात् ।
वीरमित्याह वीरो वा एष वीर्यवत्त्वात् ।
महाविष्णुमित्याह महतां वा अयं महान्रोदसी व्याप्य स्थितः ।
ज्वलन्तमित्याह ज्वलन्निव खल्वसाववस्थितः ।
सर्वतोमुखमित्याह सर्वतः खल्वयं मुखवान्विश्वरूपत्वात् ।
नृसिंहमित्याह यथा यजुरेवैतत् ।
भीषणमित्याह भीषा वा अस्मादादित्य उदेति
भीतश्चन्द्रमा भीतो वायुर्वाति भीतोऽग्निर्दहति भीतः पर्जन्यो वर्षति ।
भद्रमित्याह भद्रः खल्वयं श्रिया जुष्टः ।
मृत्योर्मृत्युमित्याह मृत्योर्वा अयं मृत्युरमृतत्वं प्रजानामन्नादानाम् ।
नमामीत्याह यथा यजुरेवैतत् ।
अहमित्याह यथा यजुरेवैतत् ॥२॥
उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतेजसम् ।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥
तृतीय खण्डः
(व्यक्तस्वरूपम)
अथ भगवांस्तमब्रवीत्प्रजापते प्रीतोऽहं किं तवेप्सितं तदाशंसेति ।
स होवाच भगवन्नव्यक्तादुत्पन्नोऽस्मि व्यक्तं मम कृत्यमिति पुराश्रावि ।
तत्राव्यक्तं भवानित्यज्ञायि व्यक्तं मे कथयेति ।
व्यक्तं वै विश्वं चराचरात्मकम् ।
यद्व्यज्यते तद्व्यक्तस्य व्यक्तत्वमिति ।
(जगत्सृष्ट्युपायो ध्यानयज्ञः)
स होवाच न शक्नोमि जगत्स्रष्टुमुपायं मे कथयेति ।
तमुवाच पुरुषः प्रजापते शृणु
सृष्टेरुपायं परमं यं विदित्वा सर्वं ज्ञास्यसि ।
सर्वत्र शक्ष्यसि सर्वं करिष्यसि ।
मय्यग्नौ स्वात्मानं हविर्ध्यायेत्तयैवानुष्टुभर्चा ।
ध्यानयज्ञोऽयमेव ।
(ध्यानयज्ञमहिमा)
एतद्वै महोपनिषद्देवानां गुह्यम् ।
न ह वा एतस्य साम्ना नर्चा न यजुषार्थो नु विद्यते ।
य इमा वेद स सर्वान्कामानवाप्य
सर्वांल्लोकाञ्जित्वा मामेवाभ्युपैति न स पुनरावर्तते य एवं वेदेति ॥ ३॥
चतुर्थः खण्डः
(ध्यानयज्ञेन परमेष्ठिनः सर्वज्ञत्वादिलाभः)
प्रजापतिस्तं यज्ञायं वसीयांसमात्मानं मन्यमानो मनोयज्ञेनेजे ।
सप्रणवया तयैवर्चा हविर्ध्यात्वात्मान मात्मन्यग्नौ जुहुयात् ।
सर्वमजानात्सर्वत्राशकत्सर्वमकरोत् ।
(अन्यस्यापि ध्यानयज्ञेन सर्वज्ञत्वादिलाभः)
य एवं विद्वानिमं ध्यानयज्ञमनुतिष्ठेत्स सर्वज्ञोऽनन्तशक्तिः
सर्वकर्ता भवति ।
स सर्वांल्लोकाञ्जित्वा ब्रह्म परं प्राप्नोति ॥ ४॥
पञ्चमः खण्डः
(लोकत्रयादिसृष्टिः)
अथ प्रजापतिर्लोकान्सिसृक्षमाणस्तस्या एव विद्याया यानि
त्रिंशदक्षराणि तेभ्यस्त्रींल्लोकान् ।
अथ द्वे द्वे अक्षरे ताभ्यामुभयतो दधार ।
तस्या एवर्चो द्वात्रिंशद्भिरक्षरै स्तान्देवान्निर्ममे ।
सर्वैरेव स इन्द्रोऽभवत् ।
तस्मादिन्द्रो देवानामधिकोऽभवत् ।
य एवं वेद समानानामधिको भवेत् ।
(वसुरुद्रादित्यसृष्टिः)
तस्या एकादशभिः पादैरेकादश रुद्रान्निर्ममे ।
तस्या एकादशभिरेकादशादित्यान्निर्ममे ।
सर्वैरेव स विष्णुरभवत् ।

tathaivarcātha tamastaut |
ugramityāha ugraḥ khalu vā eṣa mṛgarūpatvāt |
vīramityāha vīro vā eṣa vīryavattvāt |
mahāviṣṇumityāha mahatāṃ vā ayaṃ mahānrodasī vyāpya sthitaḥ |
jvalantamityāha jvalanniva khalvasāvavasthitaḥ |
sarvatomukhamityāha sarvataḥ khalvayaṃ mukhavānviśvarūpatvāt |
nṛsiṃhamityāha yathā yajurevaitat |
bhīṣaṇamityāha bhīṣā vā asmādāditya udeti
bhītaścandramā bhīto vāyurvāti bhīto:'gnirdahati bhītaḥ parjanyo varṣati |
bhadramityāha bhadraḥ khalvayaṃ śriyā juṣṭaḥ |
mṛtyormṛtyumityāha mṛtyorvā ayaṃ mṛtyuramṛtatvaṃ prajānāmannādānām |
namāmītyāha yathā yajurevaitat |
ahamityāha yathā yajurevaitat ||2||
ugraṃ vīraṃ mahāviṣṇuṃ jvalantaṃ sarvatejasam |
nṛsiṃhaṃ bhīṣaṇaṃ bhadraṃ mṛtyumṛtyuṃ namāmyaham ||
tṛtīya khaṇḍaḥ
(vyaktasvarūpam)
atha bhagavāṃstamabravītprajāpate prīto:'haṃ kiṃ tavepsitaṃ tadāśaṃseti |
sa hovāca bhagavannavyaktādutpanno:'smi vyaktaṃ mama kṛtyamiti purāśrāvi |
tatrāvyaktaṃ bhavānityajñāyi vyaktaṃ me kathayeti |
vyaktaṃ vai viśvaṃ carācarātmakam |
yadvyajyate tadvyaktasya vyaktatvamiti |
(jagatsṛṣṭyupāyo dhyānayajñaḥ)
sa hovāca na śaknomi jagatsraṣṭumupāyaṃ me kathayeti |
tamuvāca puruṣaḥ prajāpate śṛṇu
sṛṣṭerupāyaṃ paramaṃ yaṃ viditvā sarvaṃ jñāsyasi |
sarvatra śakṣyasi sarvaṃ kariṣyasi |
mayyagnau svātmānaṃ havirdhyāyettayaivānuṣṭubharcā |
dhyānayajño:'yameva |
(dhyānayajñamahimā)
etadvai mahopaniṣaddevānāṃ guhyam |
na ha vā etasya sāmnā narcā na yajuṣārtho nu vidyate |
ya imā veda sa sarvānkāmānavāpya
sarvāṃllokāñjitvā māmevābhyupaiti na sa punarāvartate ya evaṃ vedeti || 3||
caturthaḥ khaṇḍaḥ
(dhyānayajñena parameṣṭhinaḥ sarvajñatvādilābhaḥ)
prajāpatistaṃ yajñāyaṃ vasīyāṃsamātmānaṃ manyamāno manoyajñeneje |
sapraṇavayā tayaivarcā havirdhyātvātmāna mātmanyagnau juhuyāt |
sarvamajānātsarvatrāśakatsarvamakarot |
(anyasyāpi dhyānayajñena sarvajñatvādilābhaḥ)
ya evaṃ vidvānimaṃ dhyānayajñamanutiṣṭhetsa sarvajño:'nantaśaktiḥ
sarvakartā bhavati |
sa sarvāṃllokāñjitvā brahma paraṃ prāpnoti || 4||
pañcamaḥ khaṇḍaḥ
(lokatrayādisṛṣṭiḥ)
atha prajāpatirlokānsisṛkṣamāṇastasyā eva vidyāyā yāni
triṃśadakṣarāṇi tebhyastrīṃllokān |
atha dve dve akṣare tābhyāmubhayato dadhāra |
tasyā evarco dvātriṃśadbhirakṣarai stāndevānnirmame |
sarvaireva sa indro:'bhavat |
tasmādindro devānāmadhiko:'bhavat |
ya evaṃ veda samānānāmadhiko bhavet |
(vasurudrādityasruṣṭiḥ)
tasyā ekādaśabhiḥ pādairekādaśa rudrānnirmame |
tasyā ekādaśabhirekādaśādityānnirmame |
sarvaireva sa viṣṇurabhavat |

तस्माद्विष्णुरादित्यानामधिकोऽभवत् ।
य एवं वेद समानानामधिको भवेत् ।
स चतुर्भिश्चतुर्भिरक्षरैरष्टौ वसूनजनयत् ।
स तस्या आद्यैर्द्वादशभिरक्षरैर्ब्राह्मणमजनयत् ।
दशभिर्दशभिर्विड्क्षत्रे ।
तस्माद्ब्राह्मणो मुख्यो भवति ।
एवं तन्मुख्यो भवति य एवं वेद ।
तूष्णीं शूद्रमजनयत्तस्माच्छूद्रो निर्विद्योऽभवत् ।
(अहोरात्रसृष्टिः)
न वेदं इवा न नक्तमासीदव्यावृतम् ।
स प्रजापतिरानुष्टुभाभ्यामर्धर्चाभ्यामहोरात्रावकल्पयत् ।
(वेदछन्दस्सृष्टिः)
ततो व्यैच्छत् व्येवास्मा उच्छति ।
अथो तम एवापहते ।
ऋग्वेदमस्या आद्यात्पादादकल्पयत् ।
यजुर्द्वितीयात् ।
साम तृतीयात् ।
अथर्वाङ्गिरसश्चतुर्थात् यदष्टाक्षरपदा तेन गायत्री ।
यदेकादशपदा तेन त्रिष्टुप् ।
यच्चतुष्पदा तेन जगती यद्द्वात्रिंशदक्षरा तेनानुष्टुप् ।
सा वा एषा सर्वाणि छन्दांसि ।
य इमां सर्वाणि छन्दांसि वेद ।
सर्वं जगदानुष्टुभ एवोत्पन्नमनुष्टुप्प्रतिष्ठितं
प्रतितिष्ठति यश्चैवं वेद ॥५॥
षष्ठः खण्डः
(स्त्रीपुरुषमिथुनसृष्टिः)
अथ यदा प्रजाः सृष्टा न जायन्ते प्रजापतिः कथं
न्विमाः प्रजाः सृजेयमिति चिन्तयन्नुग्रमितीमामृचं गातुमुपाक्रामत् ।
ततः प्रथमपादादुग्ररूपो देवः
प्रादुरभूत् एकः श्यामः पुरतो रक्तः पिनाकी स्त्रीपुंसरूपस्तं
विभज्य स्त्रीषु तस्य स्त्रीरूपं पुंसि च पुंरूपं व्यधात् ।
उभाभ्यानंशाभ्यां सर्वमादिष्टः ।
ततः प्रजाः प्रजायन्ते ।
य एवं वेद प्रजापतेः सोऽपि त्र्यम्बक इमामृचमुद्गाय
न्नुद्ग्रथितजटाकलापः प्रत्यो अग्ज्योतिष्यात्मन्येव रन्तारमिति ।
(इन्द्राख्यायिका)
इन्द्रो वै किल देवानामनुजावर आसीत् ।
तं प्रजापतिरब्रवीद्गच्छ देवानामधिपतिर्भवेति ।
सोऽगच्छत् ।
तं देवा ऊचुरनुजावरोऽसि त्वमस्माकं कुतस्त्वाधिपत्यमिति ।
स प्रजापतिमभ्येत्योवाचैवं देवा ऊचुरनुजावरस्य कुतस्तवाधिपत्यमिति ।
तं प्रजापतिरिन्द्रं
त्रिकलशैरमृतपूर्णैरानुष्टुभाभिमन्त्रितैरभिषिच्य तं
सुदर्शनेन दक्षिणतो ररक्ष पाञ्चजन्येन वामतो द्वयेनैव सुरक्षितोऽभवत् ।
रौक्मे फलके सूर्यवर्चसि मन्त्रमानुष्टुभं
विन्यस्य तदस्य कण्ठे प्रत्यमुञ्चत् ।
ततः सुदुर्निरीक्षोऽभवत् ।
तस्मै विद्यामानुष्टुभीं प्रादात् ।
ततो देवास्तमाधिपत्यायानुमेनिरे ।
स स्वराडभूत् ।
य एवं वेद स्वराड् भवेत् ।
सोऽमन्यत पृथिवीमपि कथमपां जयेयमिति ।
स प्रजापतिमुपाधावत् ।
तस्मात्प्रजापतिः कमठाकारमिन्द्रनागभुजगेन्द्राधारं
भद्रासनं प्रादात् ।
स पृथिवीमभ्यजयत् ।

tasmādviṣṇurādityānāmadhiko:'bhavat |
ya evaṃ veda samānānāmadhiko bhavet |
sa caturbhiścaturbhirakṣarairaṣṭau vasūnajanayat |
sa tasyā ādyairdvādaśabhirakṣarairbrāhmaṇamajanayat |
daśabhirdaśabhirviṭkṣatre |
tasmādbrāhmaṇo mukhyo bhavati |
evaṃ tanmukhyo bhavati ya evaṃ veda |
tūṣṇīṃ śūdramajanayattasmācchūdro nirvidyo:'bhavat |
(ahorātrasṛṣṭiḥ)
na vedaṃ ivā na naktamāsīdavyāvṛtam |
sa prajāpatirānuṣṭubhābhyāmardharcābhyāmahorātrāvakalpayat |
(vedachandassṛṣṭiḥ)
tato vyaicchat vyevāsmā ucchati |
atho tama evāpahate |
ṛgvedamasyā ādyātpādādakalpayat |
yajurdvitīyāt |
sāma tṛtīyāt |
atharvāṅgirasaścaturthāt yadaṣṭākṣarapadā tena gāyatrī |
yadekādaśapadā tena triṣṭup |
yaccatuṣpadā tena jagatī yaddvātriṃśadakṣarā tenānuṣṭup |
sā vā eṣā sarvāṇi chandāṃsi |
ya imāṃ sarvāṇi chandāṃsi veda |
sarvaṃ jagadānuṣṭubha evotpannamanuṣṭuppratiṣṭhitaṃ
pratitiṣṭhati yaścaivaṃ veda ||5||
ṣaṣṭhaḥ khaṇḍaḥ
(strīpuruṣamithunasṛṣṭiḥ)
atha yadā prajāḥ sṛṣṭā na jāyante prajāpatiḥ kathaṃ
nvimāḥ prajāḥ sṛjeyamiti cintayannugramitīmāmṛcaṃ gātumupākrāmat |
tataḥ prathamapādādugrarūpo devaḥ
prādurabhūt ekaḥ śyāmaḥ purato raktaḥ pinākī strīpuṃsarūpastaṃ
vibhajya strīṣu tasya strīrūpaṃ puṃsi ca puṃrūpaṃ vyadhāt |
ubhābhyānaṃśābhyāṃ sarvamādiṣṭaḥ |
tataḥ prajāḥ prajāyante |
ya evaṃ veda prajāpateḥ so:'pi tryambaka imāmṛcamudgāya
nnudgrathitajaṭākalāpaḥ pratyo agjyotiṣyātmanyeva rantāramiti |
(indrākhyāyikā)
indro vai kila devānāmanujāvara āsīt |
taṃ prajāpatirabravīdgaccha devānāmadhipatirbhaveti |
so:'gacchat |
taṃ devā ūcuranujāvaro:'si tvamasmākaṃ kutastvādhipatyamiti |
sa prajāpatimabhyetyovācaivaṃ devā ūcuranujāvarasya kutastavādhipatyamiti |
taṃ prajāpatirindraṃ
trikalaśairamṛtapūrṇairānuṣṭubhābhimantritairabhiṣicya taṃ
sudarśanena dakṣiṇato rarakṣa pāñcajanyena vāmato dvayenaiva surakṣito:'bhavat |
raukme phalake sūryavarcasi mantramānuṣṭubhaṃ
vinyasya tadasya kaṇṭhe pratyamuñcat |
tataḥ sudurnirīkṣo:'bhavat |
tasmai vidyāmānuṣṭubhīṃ prādāt |
tato devāstamādhipatyāyānumenire |
sa svarāḍabhūt |
ya evaṃ veda svarāḍ bhavet |
so:'manyata pṛthivīmapi kathamapāṃ jayeyamiti |
sa prajāpatimupādhāvat |
tasmātprajāpatiḥ kamaṭhākāramindranāgabhujagendrādhāraṃ
bhadrāsanaṃ prādāt |
sa pṛthivīmabhyajayat |

CULTURA VEDICA

| | |
|---|---|
| ततः स उभयोर्लोकयोरधिपतिरभूत् । | tataḥ sa ubhayorlokayoradhipatirabhūt \| |
| य एवं वेदोभयोर्लोकयोरधिपतिर्भवति । | ya evaṃ vedobhayorlokayoradhipatirbhavati \| |
| स पृथिवीं जयति । | sa pṛthivīṃ jayati \| |
| (परमात्मप्रतिष्ठासाधनम्) | (paramātmapratiṣṭhāsādhanam) |
| यो वा अप्रतिष्ठितं शिथिलं भ्रातृवेभ्यो | yo vā apratiṣṭhitaṃ śithilaṃ bhrātṛvebhyo |
| वसीयान्भवति यश्चैवं वेद यश्चैवं वेद ॥६॥ | vasīyānbhavati yaścaivaṃ veda yaścaivaṃ veda \|\|6\|\| |
| सप्तमः खण्डः | saptamaḥ khaṇḍaḥ |
| (एतद्विद्याऽध्ययनफलम्) | (etadvidyā:'dhyayanaphalam) |
| य इमां विद्यामधीते स सर्वान्वेदानधीते । | ya imāṃ vidyāmadhīte sa sarvānvedānadhīte \| |
| स सर्वैः क्रतुभिर्यजते । | sa sarvaiḥ kratubhiryajate \| |
| स सर्वतीर्थेषु स्नाति । | sa sarvatīrtheṣu snāti \| |
| स महापातकोपपातकैः प्रमुच्यते । | sa mahāpātakopapātakaiḥ pramucyate \| |
| स ब्रह्मवर्चसं महदाप्नुयात् । | sa brahmavarcasaṃ mahadāpnuyāt \| |
| आब्रह्मणः पूर्वानाकल्पाऽश्चोत्तरांश्च वंशान्पुनीते । | ābrahmaṇaḥ pūrvānākalpā:'ścottarāṃśca vaṃśānpunīte \| |
| नैनमपस्मारादयो रोगा आदिधेयुः । | nainamapasmārādayo rogā ādidheyuḥ \| |
| सयक्षाः सप्रेतपिशाचा अप्येनं स्पृष्ट्वा दृष्ट्वा श्रुत्वा वा | sayakṣāḥ sapretapiśācā apyenaṃ spṛṣṭvā dṛṣṭvā śrutvā vā |
| पापिनः पुण्यांल्लोकानवाप्नुयुः । | pāpinaḥ puṇyāṃllokānavāpnuyuḥ \| |
| चिन्तितमात्रादस्य सर्वेऽर्थाः सिद्ध्येयुः । | cintitamātrādasya sarve:'rthāḥ siddhyeyuḥ \| |
| पितरमिवैनं सर्वे मन्यन्ते । | pitaramivainaṃ sarve manyante \| |
| राजानश्चास्यादेशकारिणो भवन्ति । | rājānaścāsyādeśakāriṇo bhavanti \| |
| न चाचार्यव्यतिरिक्तं श्रेयांसं दृष्ट्वा नमस्कुर्यात् । | na cācāryavyatiriktaṃ śreyāṃsaṃ dṛṣṭvā namaskuryāt \| |
| न चास्मादुपावरोहेत् । | na cāsmādupāvarohet \| |
| जीवन्मुक्तश्च भवति । | jīvanmuktaśca bhavati \| |
| देहान्ते तमसः परं धाम प्राप्नुयात् । | dehānte tamasaḥ paraṃ dhāma prāpnuyāt \| |
| यत्र विराण् नृसिंहोऽवभासते तत्र खलूपासते । | yatra virāṇ nṛsiṃho:'vabhāsate tatra khalūpāsate \| |
| तत्स्वरूपध्यानपरा मुनय आकल्पान्ते तस्मिन्नेवात्मनि लीयन्ते । | tatsvarūpadhyānaparā munaya ākalpānte tasminnevātmani līyante \| |
| न च पुनरावर्तन्ते । | na ca punarāvartante \| |
| (एतद्विद्यासम्प्रदानविधिः) | (etadvidyāsampradānavidhiḥ) |
| न चेमां विद्यामश्रद्दधानाय ब्रूयान्नासूयावते | na cemāṃ vidyāmaśraddadhānāya brūyānnāsūyāvate |
| नानूचानाय नाविष्णुभक्ताय नानृतिने नातपसे नादान्ताय | nānūcānāya nāviṣṇubhaktāya nānṛtine nātapase nādāntāya |
| नाशान्ताय नादीक्षिताय नाधर्मशीलाय न हिंसकाय नाब्रह्मचारिण | nāśāntāya nādīkṣitāya nādharmaśīlāya na hiṃsakāya nābrahmacāriṇa |
| इत्येषोपनिषत् ॥ | ityeṣopaniṣat \|\| |
| ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च ॥ | oṁ āpyāyantu mamāṅgāni vākprāṇaścakṣuḥ śrotramatho balamindriyāṇi ca \|\| |
| सर्वाणि सर्वं ब्रह्मोपनिषदं माहं | sarvāṇi sarvaṃ brahmopaniṣadaṃ māhaṃ |
| ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरण | brahma nirākuryāṃ mā mā brahma nirākarodanirākaraṇa |
| मस्त्वनिराकरणं मेस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते | mastvanirākaraṇaṃ mestu tadātmani nirate ya upaniṣatsu dharmāste |
| मयि सन्तु ते मयि सन्तु ॥ | mayi santu te mayi santu \|\| |
| ॐ शान्तिः शान्तिः शान्तिः ॥ | oṁ śāntiḥ śāntiḥ śāntiḥ \|\| |
| हरिः ॐ तत्सत् ॥ | hariḥ oṁ tatsat \|\| |
| इत्यव्यक्तोपनिषत्समाप्ता ॥ | ityavyaktopaniṣatsamāptā \|\| |

CULTURA VEDICA